SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# महर्षिदयानन्ददृष्ट्या अग्निविमर्शः

**Mekhala Dasgupta**
Research Scholar, S.K.B. University
Purulia, West Bengal, India
Email: mekhala210@gmail.com

**Abstract** : अग्निशब्दः वैदिकसन्दर्भे प्रचलितः शब्दो वर्तते। यद्यपि अग्निशब्दः प्रचलितो वर्तते तथापि शब्दोऽयं रहस्यावृतम्। अयं शब्दः अर्थवैचित्र्येण प्रगाढं तात्पर्यमावहति। वैदिकसाहित्ये अग्निः विविधरूपेण विद्यते। अग्नेः रूपत्रयं विद्यते। यथा— पार्थिवः अग्निः, अन्तरिक्षः अग्निः, द्युस्थानीयः अग्निः च। शब्दोऽयं पारिभाषिकशब्दरुपेण दृश्यते। लौकिकभाषायां अग्नि तेजस्वीरुपेण समुपलभ्यते। अस्मिन् विषये आर्यसमाजस्य संस्थापकः महर्षि दयानन्द सरस्वती स्वस्य विश्लेषणात्मकं अभिमतं प्रदत्तवान्। महर्षिदयानन्देन अग्निशब्दस्य अर्थरूपेण परमेश्वरः भौतिकः चेति अर्थद्वयं कृतम्। पुनः दयानन्देन अन्नादशब्दः अग्नेः द्योतकरूपेण स्वीकृयते। इतोऽपि अग्निः शब्दस्य विविधाः अर्थाः सन्तिः। महर्षिदयानन्दमतानुसारम् एतेषां सर्वेषां अर्थानां सम्यक् विश्लेषणं प्रवन्धेऽस्मिन् सविशदं कृतम्।

**Keywords:** वैदिकवाङ्मयः, दयानन्द सरस्वती, अग्निः, परमेश्वरः,तेजस्वी।

**भूमिका : —**

वैदिकवाङ्मये अग्निशब्दः अतीव महत्त्वपूर्णः वर्तते। अग्निशब्दः अग्-अगि-इणादिगत्यर्थकधातुयोगेन निष्पन्नः भवति। यद्यपि शब्दोऽयं प्रचलितः वर्तते तथापि वैदिकभाषायां शब्दोऽयं प्रसिद्धः तात्पर्यमण्डितः च वर्तते। अग्निविषये कथितमस्ति यत् "योऽञ्जति अच्यते अगति अंगति"[1] अर्थात् य प्रकाशकरूपेण ज्योतिर्मयरूपेण च विराजते सोऽग्निः। वैदिकसंस्कृतसाहित्ये अग्निशब्दस्य विविधाः अर्थाः दृश्यन्ते। वैदिकवाङ्मये अग्नेः रूपत्रयं विद्यते। यथा पार्थिवः अग्निः, अन्तरिक्षः अग्निः, द्युस्थानीयः अग्निः च। ऋग्वेदे अग्निविषयकाः विविधाः तत्त्वसमृद्धाः मन्त्राः सन्ति। तत्र अग्निः ईश्वररूपेण शक्तिरूपेण तेजरूपेण व्यापकतत्त्वरूपेण च वर्णितः। ऋग्वेदस्य प्रथमसूक्ते अग्निविषये तत्संरक्षकभूतेन ऋषिणा मधुच्छन्दसा वैश्वामित्रेण कथितं यद् अग्निः पुरोहितभूतः, कुतो हि यथा राजदरवारे राज्ञः पार्श्वे स्थित्वा राज्ञः सर्वम् अभिष्टं कार्यं सम्पादयति तथैव अग्निः अपि दैविकयज्ञादिकार्यं लौकिकहोमादिकार्यं च सर्वम् अभिष्टं कार्यं निष्पादयति। ततः सोऽग्निः दानादिगुणयुक्तत्वात् यज्ञस्य देवसदृशः। देवानां यज्ञेषु होतुः कार्यसम्पादकत्वात् ऋत्विग्भूतः। यथा ऐतरेयब्राह्मणेनापि आम्नातम् "अग्निर्वै देवानां होता" इति।[2] तदनु सोऽग्निः रत्नधारकः अर्थात् रत्नादिपदार्थानां धारकः। यागफलरूपाणां रत्नानाम् अतिशयेन धारयितारं पोषयितारं चेति सायणाचार्यमतम्।[3] "अग्निर्वै सर्वा देवताः"[4] इति वचनानुसेरेण अग्निः देवेषु श्रेष्ठः। तस्मात् सोऽग्निः पुरातनैः भृग्वङ्गिरादिभिः ऋषिभिः नूतनैश्च इदानीन्तनैः अस्माभिः अपि स्तुत्यः। यथोक्तं "अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरुत। स देवां एह वक्षति।"[5] अन्तरिक्षरूपस्य अग्नेः माहात्म्यविषये ऋग्वेदस्य ऋषिणा प्रोक्तम्– "सूर्यो न दिवास्पातु वातो अन्तरिक्षात् अग्निर्नः पार्थिवेश्यः।"[6] ऋग्वेदे उल्लेखोऽस्ति यत् यः अग्निं धारयति स धनवान्, तेजस्वी, यशस्वी च भवति। अत उच्यते—

"अग्निना रयिमश्नवत् पोषमेव दिवे दिवे।
यशसं वीरवत्तमम्।।"[7]

द्यौस्थानीयाग्निविषये अथर्ववेदस्य ऋषिणा प्रार्थितं "सूर्य चक्षुषा मा पाहि।"[8] मैत्रायणिसंहितायाम् अग्निपरकमन्त्राः संग्रहिताः सुसज्जिताः च दृश्यन्ते। तत्र अग्निविषयान् ऋग्वेदमन्त्रान् आधारिकृत्य पवमानः, पावकः, शुचि च शब्दाः समुल्लिखिताः सन्ति। यथा- (क) "अग्निः ऋषिः पवमानः पाञ्चजन्यः।"[9] (ख) "अग्नेः पावक रोचिषा।"[10] (ग) "अग्निः शुचिव्रततमः"[11] इति।

ब्राह्मणसाहित्येऽपि अग्निः विविधरूपेण वर्णितः। ऐतरेयब्राह्मणे अग्नेः सप्तशरीरस्य वर्णनं समस्ति।[12] यथा— वायुः, इन्द्रवायुः, मित्रावरुणरूपः अग्निः च इति। ऐतरेयब्राह्मणवत् सामवेदीयब्राह्मणेऽपि तेजोरूपस्य अग्नितत्त्वस्य वर्णनं विद्यते। अरुणस्य पुत्रः आरुणिः याज्ञवल्क्यस्य गुरुः आसीत्। स स्व पौत्राय तेजविज्ञानस्य ज्ञानं दत्तवान्। जैमिनीयब्राह्मणे अग्नेः कृते भूपतिः भुवनपतिः भूतपतिः च आदिसंज्ञा संगृह्यते।[13] शतपथब्राह्मणे स्पष्टतया शुक्लरूपयुक्तस्य अग्नेः वर्णनं दृश्यते— "यत् शुक्लं तदाग्नेयं यत् कृष्णं तत् सौम्यम्।"[14] छान्दोग्योपनिषदि अपि अग्नेः वर्णविषयः उल्लेखः अस्ति—

"यदग्नेरोहितरूपं तेजसस्तद्रूपं यच्छुक्लं
तदंपा. यत्कृष्णं तदन्नस्यापागादग्निरग्नित्वं
वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्।।"[15]

अर्थात् अग्नौ विहितः रक्तवर्णः तेजरूपस्य प्रतीकरूपेण, श्वेतवर्णः जलस्य प्रतीकरूपेण, कृष्णवर्णः अन्नरूपेण च विद्यन्ते।

निरुक्तकारः आचार्ययास्कः अग्नेः देवताविषयकं विचारं सप्तमाध्याये उपस्थापयन् आह— "तिस्र एव देवता इति नैरुक्ताः।"[16] तत्र अग्निः पृथिवीस्थानः। अनन्तरम् सः अग्नेः स्वरूपविषये उक्तवान्— "यज्ञेन यज्ञमयजन्त देवाः, अग्निनाग्निमजयजन्त देवाः, अग्निः पशुरासीत् तमालभ्यन्त तेनाजयन्तेति च ब्राह्मणम्। तानि धर्माणि प्रथमान्यासन्, ते ह नाकं महिमानः समसेवन्त, यत्र पूर्वे साध्याः सन्ति देवाः, साधनाः, द्युस्थानो देवगण इति नैरुक्ताः।"[17]

एवं वैदिकसाहित्ये अग्निः विविधरूपेण विद्यते। महीधर-उवट-सायणादिभिः प्रमुखैः विद्वद्भिः भाष्ये अग्निविषयः लिखितः। परन्तु तेन महर्षिणा कृतः अग्निविमर्शः अन्यतमः वर्तते। अग्नितत्त्वस्य किं माहात्म्यम्? किं वा तस्य स्वरूपम्? इत्यादिविषये दिग्दर्शनार्थं महर्षिदयानन्ददृष्ट्या अग्निविमर्शः इति विषयः निर्वाचितः।

**अग्निशब्दविमर्शः—**

अग्निशब्दस्य व्युत्पत्तिविषये आचार्येण दयानन्देन स्वाभिमतं प्रदत्तं "गतेस्त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्चेति, पूजनं नाम सत्कारः" इति।[18] अर्थात् यः ज्ञानस्वरूपं सर्वत्र पुज्यः च तस्य परमेश्वरस्य नाम अग्निः। पुनः भिन्नरूपेण उक्तम् "अच्यते प्राप्यते सक्रियते वा वेदादिभिः शास्त्रैर्विद्वद्भिश्चेत्यग्निः परमेश्वरः"[19] अर्थात् यः ज्ञानरूपेण सक्रियरूपेण च सर्वत्र लभ्यते सोऽग्निः।

महर्षिदयानन्देन अग्निशब्दस्य द्योतकरूपेण परमेश्वरः भौतिकः चेति अर्थद्वयं कृतम्। महर्षिणा "अग्निमीळे पुरोहितम्"[20] इत्यस्मिन् मन्त्रे अग्निशब्दस्य परमेश्वरः इत्यर्थः कृतः। विषयेऽस्मिन् महर्षिणा दयानन्देन विद्यानेत्रात् पञ्च प्रमाणानि आधाराररूपेण उल्लिखितानि। यथा— (क) "इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुवर्णो गरुत्मान्। एकं सद् विप्राः बहुदा वदन्त्यग्निं यमं

मातरिश्वानमाहुः।।"[21], (ख) "तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः।।"[22] (ग) "अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरा गमत्।।"[23] (घ) "यत्सच्चिदानन्दादिलक्षणं ब्रह्म तदेवात्राग्न्यादिनामवाच्यमिति बोधम्। ब्रह्म ह्यग्निः।।"[24] (ङ) "आत्मा वा अग्निः"[25] चेति। अनन्तरं "अयं वा अग्निः प्रजाश्च प्रजापतिश्च"[26] अस्मात् प्रमाणात् मन्त्रे स्थितेन प्रजाशब्देन दयानन्देन भौतिकाग्निः एवञ्च प्रजापतिशब्देन परमेश्वरः इति अर्थः कृतः। भौतिकाग्निः कथम्? तस्य प्रयोगः वा कीदृशः? इति विषयेऽस्मिन् मन्त्रे लिखितमस्ति "यत्सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन। अग्नये जातवेदसे।"[27] पुनरपि तेन महर्षिणा "अग्निर्वै सर्वा देवताः"[28] अनेन प्रमाणेन अग्निशब्दस्य कृते परमेश्वरः सांसारिकाग्निः चेति अर्थद्वयं संगृह्यते, यः परमेश्वरः शब्दस्य द्योतकः भवति। कारणमत्र सर्वदेवताशब्देन परमेश्वरार्थस्य ग्रहणं भवति। अनन्तरं 'संवत्सरोऽग्निः' प्रभृतिः इति प्रमाणेन अपि अग्निशब्दस्य परमेश्वरः इत्यर्थः गृहीतः। अग्निशब्दस्य निर्वचनविषये यास्काचार्ये तु स्वच्छन्दप्रवृत्तिशीलः दृश्यते। यथोक्तम्— "अग्रणीभर्वति। अग्रं यज्ञेषु प्रणीयते। अङ्गं नयति सन्नममानः। अक्नोपनो भवतीति स्थौलाष्ठीविः। न क्नोपयति न स्नेहयति, विरुक्षी करोतित्यर्थः।"[29] अस्मिन् विषये निरुक्तकारस्य मतं स्वीकृत्य आचार्येण दयानन्देन अग्निशब्दस्य परमेश्वरः भौतिकः चेति अनयोः शब्दद्वयोर्वाचकरूपेण स्वीक्रियते। तत्र 'अग्रणी' इति शब्देन उत्तमः परमेश्वरः इति विज्ञायते। यतो हि 'इन् गतौ' इति धातुः ज्ञानार्थकः भवति। तत्र 'इतात्' इति पदात् ज्ञानस्वरूपः परमेश्वरः विवेच्यते। पुनः 'दग्धात्' इति पदेन केवलं भौतिकाग्निरेव बोध्यते। अनन्तरम् अक्तात् नीतात् च एतौ द्वौ शब्दौ परमेश्वरस्य भौतिकशब्दस्य च प्रयोज्येते। पुनः "उत्तरे ज्योतिंषी एतेन नामाधेयेन भजेते"[30] अनेन वाक्येन अग्निशब्देन परमेश्वरः भौतिकाग्निश्च अर्थद्वयं गृहीतम्। पुनः शतपथब्राह्मणग्रन्थेऽपि अग्निः भौतिकाग्निरूपेण संलक्ष्यते।

उपनिषत्सु तैत्तिरीयोपनिषद् प्रसिद्धोपनिषद् अस्ति। तत्र समुल्लिखितः परमेश्वररूपाग्निः दयानन्दानुसारं "अन्नादः" इति नाम्ना अभिहीतः। तत्र अन्नादशब्दः अग्नेः द्योतकरूपेण वर्तते। यः परमेश्वरस्य वाचकोऽस्ति। यथा— "तद्यदेनं मुखादजनयत्तस्मादन्नादोऽग्निः स यो हैवमेतग्निमन्नादं वेदान्नादो हैव भवति।"[31]

अग्निशब्दस्य न केवलमीश्वर एव नाम अस्ति अपितु तस्य अन्यानि नामानि अपि सन्ति। यथा 'अग्निर्होता कविक्रतुः'[32] इत्यत्र कविः इति शब्दः सर्वज्ञरूपेण विनाशरहितरूपेण च प्रतिपद्यते। "तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः।।"[33] इति कृष्णयजुर्वेदीयमन्त्रांशे अग्नि-वायु-सूर्यादयादीनि नामानि परमेश्वरस्य वाचकानि सन्ति। "इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुवर्णो गरुत्मान्। एकं सद् विप्राः बहुदा वदन्त्यग्निं यमं मातरिश्वानमाहुः।।"[34] इति मन्त्रांशे प्रयुक्तानि इन्द्र-वरुण-अग्नि-मित्रादीनि नामानि अग्नेः पर्यायरूपेण सन्ति। ऋग्वेदे अग्निः यज्ञस्य दूतरूपेण संदृश्यते। अग्निरयं त्रिभुवने शुद्धरूपेण चेतनरूपेण पवित्ररूपेण पापरहितादिरूपेण च परिलक्ष्यते। तद् व्यतिरिच्य मेधावी सर्वज्ञः वैश्वानरः वह्निः शुष्मन् शौचिष्केशः अनलः हिरण्यरेतः हुतभुजः दहनः हव्यवाहनः धनञ्जयः दमुनः चित्रभानुः धूमकेतुः त्रेता शूचिः जातवेदः सत्यः शाश्वतः च विविधानि नामानि अग्निशब्दस्य पर्यायरूपेण विद्यन्ते।

वैदिकसाहित्येऽग्नेः विविधानि रूपाणि दृश्यन्ते। तत्र अग्नेः प्रशासनम् अपि दरीदृश्यते। महर्षिदयानन्देन अग्नेः कृते विविधानि विशेषणानि प्रयुक्तानि। दयानन्देन अग्नेः शान्तिदायकरूपेण वेगवान् -रूपेण प्रकाशकरूपेण च वर्णनं कृतम्। यथोक्तं "या वेगवानन्येभ्यो वेगप्रदः शान्तिकरः पृथिव्यादीनां

प्रकाशकोऽग्निवर्तते य कथं न विज्ञेयः।"[35] पुनः ऊर्ध्वगामी सर्वेषां रक्षकः अर्थात् अग्नेः ज्ञानाय नानाविधकार्याणां सिद्ध्यार्थम् आदेशः सः दत्तवान्— "हे मनुष्याः, योऽयमूर्ध्वगन्ता सर्वदर्शनहेतुः सर्वेषां पालननिमित्तोऽग्निरस्ति, तं विज्ञाय कार्याणि सततं साध्नुत।"[36] पुनरपि अग्नेः स्वरूपविषये तेनोक्तं यत् यः धूमज्ञानयुक्तः हरणशीलगुणयुक्तः च विद्यते स एव अग्निः कथ्यते। प्रसङ्गेऽस्मिन् वचनमस्ति— "हे मनुष्याः, येषां धूमो विज्ञापको वायुः प्रदीपको हरणशीलता च येषु वर्त्तते, तेऽग्नयः सन्तीति विजानीत।"[37] अग्निसूर्यादिविमर्शप्रसङ्गे आलोचनां कर्तुं तेन अग्निः एव सूर्यः इति निगदितम्। अतः उच्यते— "यूयं योऽयमग्निरीश्वरेण निर्मितः स तत्सत्तया स्वस्वरूपं धारयन् सन् रात्रिस्थान् व्यवहारान् प्रकाशयति। एवं च सूर्य उषःकालमेत्य सर्वाणि मूर्तद्रव्याणि प्रकाशयितुं शक्नोतीति विजानीत।"[38]

एतद्भिन्नं दयानन्देन अग्नेः नानाविधेषु स्वरूपेषु अन्यतमस्य एकस्य दूतगुणस्य व्याख्या कृता। तेन कथितम् अग्निः दूतस्वरूपः भवति। यथा दूतः कार्यसिद्ध्यार्थं सहायकः भवति तथैव अग्निः सुखसम्बन्धितकार्यसिद्ध्यार्थम् उपकारकोऽस्ति। विषयेऽस्मिन् तेन भाष्ये उच्यते— "यथा कार्यार्थं प्रेषितो दूतः कार्यसाधको भवति तथा सम्प्रयोजितोऽग्निः सुखकार्य्यसिद्धिकरो भवति।"[39] अग्नेः शीतनिवारकविषये स्वानुभवं प्रकटं कृत्वा स उक्तवान् यत्— "अग्निना तुल्यं शीतनिवारकं वस्तु, पृथिव्या तुल्यं महत् क्षेत्रं किमपि रपनास्तीति मनुष्यैरिवेदितव्यम्।"[40] अनन्तरं स अग्निविद्यायाः प्रयोजनमुल्लिख्य उक्तवान् मनुष्याणां श्रेष्ठगुणार्थं कार्यार्थं च अग्निविद्यायाः प्रयोजनम् अस्ति। विषयेऽस्मिन् उक्तं यत्— "मनुष्यैर्दिव्यगुणकर्म्मसिद्धये विद्युदादेराग्नेर्विद्या संप्रेक्षणीया।"[41] अनया अग्निविद्यया मनुष्याः धनं बलं च लभ्येते, रोगाणां नाशम् अपि कुर्वन्ति। अग्निना विद्युदादिकार्याणां गृहनिर्माणकार्याणां च सिद्ध्यार्थं नानाविधफलप्राप्तिः जायते।

अग्निः विविधेन कार्येण सिद्धिं करोति, विषयेऽस्मिन् महर्षिणा सविशदं भाष्ये व्याख्या कृता। स अग्निम् अश्वेन सह तुलयति। प्रसङ्गेऽस्मिन् उच्यते— "यथा सुशिक्षितः सारथिरश्वैरनेकानि कार्य्याणि साध्नोति तथा कृतविद्यो जनोऽग्न्यादिभिरनेकानि कार्याणि साध्नुयात्।"[42]

रोगमुक्तं जीवनं सर्वेषाम् अभिप्रेतं वर्तते। रोगमुक्तिभूतस्य अग्नेः बहुः उपयोगिताऽस्ति। ये मनुष्याः रोगादिक्लेशनिवृत्त्यर्थम् अग्निप्रभृतिपदार्थस्य उपासनं कुर्वन्ति, ते सुखं प्राप्नुवन्ति। अग्निना रोगनिवृत्तिः भवतीति एवं वर्णनं यजुर्वेदभाष्ये महर्षिणा दयानन्देन निगदितम्। "ये मनुष्याः रोगादिक्लेशानिवृत्तये वह्न्यादीन् पदार्थीन् संप्रयुञ्जते, ते सुखिनो जायन्ते।"[43] अग्निः भारवाहनस्य कार्यमपि सम्पन्नं करोति। यः योग्यः मनुष्यः अग्निं जीवरूपेण सेवां करोति सः अग्निः तस्य भारवाहनस्य कार्यमपि करोति। अतः यजुर्वेदभाष्ये उच्यते "मनुष्या यमग्निं जीवाः सेवन्ते, तेन भारवहनादीनि कार्य्यान्यपि साध्नुवन्तु।"[44]

पृथिवीलोके अन्तरिक्षलोके द्युलोके च यज्ञस्य स्थानं महत्त्वपूर्णं वर्तते। शतपथब्राह्मणे उल्लिखितमस्ति— 'यज्ञो वै श्रेष्ठतमं कर्मः।' यज्ञेऽस्मिन् अग्नेः भूमिका महती अस्ति। ब्रह्मणा यज्ञसिद्धये अग्निवायुसूर्यैश्च क्रमशः ऋग्वेदः यजुर्वेदः सामवेदः च प्रकाशितः। अतः मनुसंहितायाम् उच्यते—

"अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम्।।"[45]

अग्नेः सहायेन खनिजसम्पदसमृद्धिः रोगादिनिवारणं पर्यावरणसंरक्षणं च भवन्ति। यथा यजुर्वेदे निगदितमस्ति— "ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन्।।"[46]

अनन्तरं वेदविहिताग्नेः भेदविषयेऽपि दयानन्देन भाष्ये तस्य स्वाभिमतं व्यक्तं कृतम्। अस्मिन् विषये

तेन उक्तं प्रथमतः अग्निः द्विविधः अस्ति। एकः कार्यरूपसूर्यादिः अपरश्च करणरूपः। अग्निविषये उल्लिखितम्— "मनुष्यैरिह योऽग्निः किल कार्य्यकारणभेदेन द्विधास्ति, तत्र कार्य्यरूपेण सूर्य्यादावग्नौ कारणरूपा विद्यत् सर्वभूतद्रव्येषु प्रविष्टा सती वर्त्तते, तस्यां च विज्ञानेन प्रविश्यैत सम्यक् संप्रयोज्य कार्य्योपयोगः कर्त्तव्यः।"[47] द्वितीयतः अस्य अग्नेः मानसं बाह्यं च दृष्ट्वा अनेके भेदाः सन्तीति वदन्ति। यथा— "द्विविधोऽग्निर्मानसो बाह्यश्चास्ति तेयाराभ्यन्तरं युक्ताभ्यामाहारविहाराभ्यां बाह्यं मन्थनादिभ्यः सर्वे सेवन्ताम्। तथेतरे भजन्तु।"[48] तृतीयतः स्थूलः सूक्ष्मः च भेदेन अस्य अग्नेः प्रकारद्वयमस्ति। "विश्वस्य दूतममृतमिति द्विरावृत्या द्विविधस्य स्थूलसूक्ष्मस्याग्नेर्ग्रहणम्। स सर्वः कारणरूपेण नित्यं इति वेद्यम्।"[49] पुनः कुत्रचित् अग्निः त्रिविधरूपेण सम्प्राप्यते। एतस्य प्रमाणरूपेण भाष्ये दयानन्दः समुल्लिखितवान् "ईश्वरेण यः सूर्य्यविद्युत्प्रत्यक्षरूपेण त्रिविधोऽग्निर्निमितः, स मनुष्यैर्विद्यया सम्यग्योजितः सन् बहूनि कार्य्याणि साधयताति।"[50]

अग्नेः सामर्थ्यविषये यजुर्वेदभाष्ये दयानन्देन लिखितं यत्— "यथा गृहस्था मनुष्या आसनान्नजलवस्त्रप्रियवचनादिभिरुत्तमगुणमतिथिं सेवन्ते तथैव विद्वद्भिर्यज्ञवेदीकलायन्त्रयानेष्वग्निं स्थापयित्वा यथायोग्यैरिन्धनाज्यजलादिभिः प्रदीप्य वायुवृष्टिजलशुद्धियानोपकारश्च नित्यं कार्या इति ।"[51]

दयानन्देन अग्निः धनशक्तिप्रदायकरूपेण वर्णितः। कुतो हि अग्निः धनादिशक्त्याः प्रदाता वर्तते। यजुर्वेदभाष्ये तेन कथितं "गृहस्थैर्यदेश्वरमुपास्यैतस्याज्ञायां वर्त्तित्वायमग्निः कार्यसिद्धये संयोज्यते, तदानेकविधे धनबले अत्यन्तं विस्तारयति।"[52] पुनः "मनुष्यैः परमेश्वरानुग्रहस्वपुरुषार्थाभ्यामग्निविद्यां प्राप्यानेकविधं धनं बलं च सर्वतो विस्तारणीयमिति।"[53] विद्वद्भिः जनैः अग्नेः सहयोगेन गुणः कर्म सत्स्वभावः सुखः च प्राप्यन्ते। सर्वेषामुन्नतिकारणरूपेण अग्निः अस्ति इति दयानन्देन भाष्ये भणितं- "यथा सुसेविता विद्वांसो विद्याधर्मसुशिक्षाभिः सर्वानार्यान् सम्पादयन्ति तथा युक्त्या सेविताऽग्निः स्वगुणकर्मस्वभावैः सर्वानुन्नयति।"[54] वाहनानां वेगस्य अग्नेः भूमिका महती अस्ति। यथा उच्यते- "योऽग्निरिन्धनैर्जलेन युक्तो यानेषु प्रयुक्तः सन् बलेन सद्यो गमयति तं विज्ञायोपकुरुत।"[55] तत्र दयानन्देन ऐश्वर्यप्राप्तेः उपायरूपेण अग्निविद्या स्वीक्रियते। स अवदत् अग्निविद्यां स्वीकृत्य शिल्पविद्यया धनं प्राप्तुं शक्यते— "ये मनुष्याः, पावकादिविद्यया सङ्गन्तव्यं शिल्पयज्ञं साधयन्ति ते ऐश्वर्यं लभ्यन्ते।"[56] अग्निसन्दर्भे अग्निहोत्रशब्दः तात्पर्य्यमण्डितः अस्ति। अग्नये परमेश्वराय जलवायुशुद्धिकरणाय यत्कर्म क्रियते तद् अग्निहोत्रं इति कथ्यते। अस्य अग्निहोत्रस्य उद्देश्यम् ऋग्वेदादिभाष्यभूमिकायामुल्लिखिमस्ति। अग्निहोत्रेण सुखसमृद्धिः लभ्यते। अग्निविद्यायां दिवारात्रि-शयन-जागरण-जीवन-मरणादयः सन्ति।

**उपसंहारः—**

अन्ते निष्कर्षरूपेण वक्तुं शक्यते यत् अग्निः सर्वशक्तिनां स्रोतः वर्तते। पृथ्वी-जल-वायु-आकाशादयः भूतानाम् विशेषस्वरूपाः सन्ति। अग्निः वैदिकदेवतासु अग्रगण्यः अस्ति। वेदे उल्लिखिताः अग्निपरकमन्त्राः वैज्ञानिकरूपेण दृष्टिप्रदायकाः सन्ति। आध्यात्मिकदृष्ट्या वेदे अनेकेषु मन्त्रेषु अग्निशब्देन ईश्वरः भौतिकाग्निः चार्थः संगृह्यते। पुनः स तेजस्वरूपः व्यापकस्वरूपः चास्ति। दयानन्देन वेदानां मन्त्राणामाधारेण तस्य सुगभीरचिन्तनपूर्णाभिमतं भाष्ये प्रकटं कृतम्। महर्षिणा प्रदत्तः अग्निविमर्शः अति सहजबोध्यः भावग्राह्यः तथ्यसमृद्धः च अस्ति। महर्षिणा अग्नेः वर्णनं व्यापकरूपेण वैज्ञानिकरूपेण आध्यात्मिकरूपेण च सुस्पष्टतया उपस्थापितम्। तेन प्रदत्तः अग्निविमर्शोऽपि अत्यन्तं तात्पर्यपूर्णोऽस्ति।

## Endnotes

1. शास्त्री, ज्ञानप्रकाश। *दयानन्द-सन्दर्भ-कोषः*। दिल्ली: परिमलपब्लिकेशन्सः, 2019, पृ.71.
2. ऐ.ब्रा. – 3.14
3. सा.भा.ऋ.सं. – 1.1
4. ऐ.ब्रा.- 1.1, श.ब्रा.- 1.6.2.8, 3.1.3.1
5. ऋ.सं. – 1.2
6. तदेव – 7.62.5
7. ऋ.सं. – 1.3
8. अथ. सं – 2.16.3
9. ऋ.सं. – 6.66.20
10. तदेव - 5.26.1
11. तदेव – 8.44.21
12. ऐ.ब्रा – 3.1.3
13. जैमि. ब्रा – 2.41
14. शत.ब्रा – 1.6.3.39
15. छान्द. उप – 4.2
16. निरुक्तम् – 7.2
17. निरुक्तम् – 12.41
18. शास्त्री, ज्ञानप्रकाश। *दयानन्द-सन्दर्भ-कोषः*। दिल्ली: परिमलपब्लिकेशन्सः, 2019, पृ.71.
19. तदेव
20. ऋ.सं.- 1.1.1
21. ऋ.सं.- 164.46
22. यजु. सं.- 32.1
23. ऋ.सं.- 1.1.5
24. श.ब्रा- 1.4.2.11
25. श.ब्रा- 1.2.3.2
26. श.ब्रा- 9.1.2.42
27. यजु. सं. – 3.2
28. ऐ.ब्रा.- 1.1, श.ब्रा.- 1.6.2.8, 3.1.3.1
29. निरुक्तम् – 7.4
30. शास्त्री, ज्ञानप्रकाश। *दयानन्द-सन्दर्भ-कोषः*। दिल्ली: परिमलपब्लिकेशन्सः, 2019, पृ.73.
31. तत्रैव, पृ.76.
32. ऋ.सं.- 1.1.5
33. यजु. सं.- 32.1
34. ऋ.सं.- 164.46
35. दया.भा.य.सं. – 15.34
36. तदेव – 27.11
37. तदेव – 33.2
38. तदेव – 3.10
39. तदेव – 22.16
40. तदेव – 23.10
41. तदेव – 12.104
42. तदेव – 37.4
43. तदेव – 67.9
44. तदेव – 15.31
45. मनु.सं. – 1.23
46. यजु.सं. - 2.34
47. दया.भा.य.सं.- 5.4
48. तदेव – 15.28
49. तदेव – 15.33
50. तदेव – 2.3
51. तदेव – 3.1
52. तदेव – 3.39
53. तदेव – 3.40
54. तदेव – 15.47
55. तदेव – 18.14
56. तदेव – 18.42

## Bibliography

- *ऐतरेयब्राह्मणम्*। सम्पा. सुधाकरमालवीयः । वाराणसी : तारा बुक एजेन्सी, 2015.
- *यजुर्वेदभाष्यम्*। सम्पा. दयानन्द सरस्वती। दिल्ली : मानव-उत्थान-संकल्प-संस्थानम्, 2010.
- *ऋग्वेदभाष्यम्*। सम्पा. दयानन्द सरस्वती। दिल्ली : मानव-उत्थान-संकल्प-संस्थानम्, 2010.

- द्विवेदी, कपिलदेव। *वैदिक साहित्य एवं संस्कृति*। वाराणसी : विश्वद्यालय प्रकाशन, (7 th Ed.) 2018.
- द्विवेदी,कपिलदेव। *वेदों में विज्ञान*। ज्ञानपुर : विश्वभारती-अनुसन्धान-परिषद्, 2000.
- *निरुक्तम्*। सम्पा. छज्जूराम शास्त्री । नई दिल्ली : मेहरचन्द-लछमनदास-पब्लिकेशनः, 2016.
- *शतपथब्राह्मणम्*। सम्पा. स्वामी सत्यप्रकाश सरस्वती। दिल्ली :विजयकुमार-गोविन्दराम-हासानन्दः, 2010.
- शास्त्री, ज्ञानप्रकाश। *दयानन्द-सन्दर्भ-कोषः*। दिल्ली : परिमलपब्लिकेशन्सः, 2019.
- गुप्तः, रामेश्वरदयाल । *वैदिक बाङ्मय में विज्ञान*। । दिल्ली : नागप्रकाशनः, 1997.


———